("कान्तार्थिनी तु या याति संकेतं साभिसारिका" इत्युक्तलक्षणा कान्तप्रार्थनया स्वयं संकेतस्थानगामिनी स्वस्थाने वा कान्तानयनकारिणी नायिका। यदुक्तं दर्पणकारैः।

"अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका" ॥)

अभिहारः, पुं. (अभि + हृ + घञ्।) चौर्य्यं। सम्मुखे हरणं। तत्पर्य्यायः। अभिग्रहणं २। इत्यमरः॥ सन्नहनं। कवचधारणं। अभियोगः। अपचिकीर्षयाभिगम्याक्रमणं। इति मेदिनी॥ (साहसं। अपहरणं।

"यस्याभिहारं कुर्य्याच्च स्वयमेव नराधिपः"।
इति महाभारते।)

अभिहितं, त्रि, (अभि + धा + कर्म्मणि क्तः।) उक्तं। कथितं। इत्यमरः॥

("अर्थिनाभिहितोयोऽर्थः प्रत्यर्थी यदि तं तथा।
सम्भोजिनी साभिहिता पैशाची दक्षिणा द्विजैः"॥
इति मनुः।)

अभीकः, पुं, (अभि + कन्, "अनुकाभिकाभीकाः कामयिता" इति पाणिनिसूत्रम्।) कविः। इति मेदिनी॥ स्वामी॥ इति हलायुधः॥ (पतिः। कामुकः। कामी।

"ददृशे पर्णशालायां राक्षसाभीकयाथ सः"।
इति भट्टिकाव्ये।

उत्सुकः। क्रूरः। निष्ठुरः। निर्भयः। निःशङ्कः।

("अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ"।
इति मेदिनी।)

अभीकः, त्रि, (अभि + कन्।) कामुकः। क्रूरः। उत्सुकः। निर्भयः। इति शब्दरत्नावली॥

अभीप्सितं, त्रि, (अभ्याप्तुं प्राप्तुमिष्टं, अभि + आप् + सन् कर्म्मणि क्तः।) वाञ्छितं। अभीष्टं। इत्यमरः॥

("मेने मेनापि तत्सर्व्वं पत्युः कार्य्यमभीप्सितं"।
इति कुमारसम्भवे।)

अभीरः, पुं, (अभीरयति गा अभिमुखीकृत्य गोष्ठं नयति, अभि + ईर + णिच् + अच्।) आभीरः। गोपः। इत्यमरटीकायां रमानाथः॥

अभीरुः, पुं, (भी + कर्त्तरि शीलार्थे क्रुः ततो नञ्समासः।) भैरवः। यथा,—

"अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः"।
इति वटुकभैरवस्तवः॥ निर्भये त्रि॥ (निर्भीकः। भयहीनः। निःशङ्कः। "स्थाने युद्धे च कुशलानभीरूनविकारिणः"। इति मनुः।)

अभीरुः, स्त्री, (भी + कर्त्तरि क्रु शीलार्थे, नञ्समासः।) शतमूली। इत्यमरः॥

अभीरुपत्री, स्त्री, (भी + कर्त्तरि क्रु शीलार्थे, नञ्समासः, वा स्त्रियां ऊङ् असंकुचितपत्रत्वात् तस्यास्तथात्वं, न भीरूणि पत्राणि यस्याः सा, स्त्रियां ङीप्।) शतमूली। इत्यमरः॥

अभीशुः, पुं, (अभितः श्यति मुखं तनूकरोति, अभि + शो + कु, पृषोदरादित्वात् दीर्घः।) प्रग्रहः। वाग्डोर इति भाषा। ("स्थिरा वसन्तु नेयोरथो अश्वा स एषां सुसंस्कृता अभीशवः"। इति ऋक्। वेदेऽस्य प्रचुरप्रयोगः॥ किरणं। इति हलायुधः॥

अभीशुः, स्त्री, (अभितः अश्नुते व्याप्नोति, अभि + अश् + कर्त्तरि उन्, पृषोदरादित्वात् अलोपो दीर्घः।) अङ्गुलिः। वेदेऽस्य प्रचुरप्रयोगः॥

अभीषङ्गः, पुं, (अभि + सन्ज घञ्, दीर्घः।) आक्रोशः। इत्यमरः॥

अभीषुः पुं, (अभि + इष् + उ।) किरणः। इत्यमरः॥ कामः। अनुरागः। इति शब्दरत्नावली॥

अभीष्टं, त्रि, (अभि + इष् + कर्म्मणि क्तः।) वाञ्छितं। तत्पर्य्यायः। अभीप्सितं २ हृद्यं ३ दयितं ४ वल्लभं ५ प्रियं ६। इत्यमरः॥

("प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा"।
इति हितोपदेशः।
"अभीष्टायामभूद्ब्रह्मन् पितुरत्यन्तवल्लभः"।
इति विष्णुपुराणं।)

अभीष्टा, स्त्री, (अभि + इष् + क्त, स्त्रियां टाप्।) रेणुकानामगन्धद्रव्यं। इति शब्दचन्द्रिका॥

("ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा।
हरेणुः रेणुका कौन्ती कपिला भस्मगन्धिनी॥
ताम्बूल्यां कटुकाभीष्टा देवाभीष्टा महाशया"।
इति शब्दचन्द्रिका।)

अभीक्ष्णं, क्ली, (क्षणमभिगतं, प्रादिसमासः पृषोदरादित्वात् दीर्घः अलोपश्च।) भृशं। नित्यं। तद्युक्तक्रिययोऽस्त्रि। इति मेदिनी॥ (पुनः पुनः। शश्वत्। अविरतं। निरन्तरं। "उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमः"। इति माघः॥

"इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि
न ज्ञातयस्तुल्यकुलस्य लक्ष्मीं"।
इति भट्टिकाव्ये।)

अभीक्ष्णं, व्य, (अभि + क्ष्णु तेजने डमु, पृषोदरादित्वात् दीर्घः "स्वरादिनिपातमव्ययम्" इति अव्ययं।) पुनः पुनः। अनारतं। इत्यमरः॥

अभुक्तः, त्रि, (भुज् + भावे क्तः अर्श आद्यच् विद्यमानार्थे, नञ्समासः, वा भुज + कर्म्मणि क्तः, नञ्समासः।) उपवासी। यथा,—

"अभुक्तस्य दिवानिद्रा पाषाणमपि जीर्य्यति"।
इति वैद्यकं॥ अकृतभोजनं वस्तु॥ (भुक्ता ब्राह्मणाः पीता गाव इति पाणिनिभाष्यम्। 'नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि'। इति पुराणम्।)

अभूमिः, स्त्री, (न भूमिः, नञ्समासः।) स्थानाभावः। अनाधारः। आश्रयाभावः। यथा। "अभूदभूमिः प्रतिपक्षजन्मनां भियाम्" इति माघः॥ "नाभूदभूमिः स्मरशायकानाम्" इति नैषधं॥

अभेदः, त्रि, (नास्ति भेदो यस्य सः।) भेदरहितः। अविशेषः। यथा,—"अभेदः शिवरामयोः" इति पुराणं॥ (तादात्म्यम्।

"काकः कृष्णः पिकः कृष्णः कोभेदः पिककाकयोः।
वसन्ते समुपायाते काकः काकः पिकः पिकः"॥
इति नीतिरत्ने। "भेदेऽप्यभेदः सम्बन्धे सम्बन्धस्तद्विपर्य्ययौ"। इति साहित्यदर्पणे।)

अभेद्यं, क्लीं, (भेत्तुं न शक्यते, भिद् + शक्यार्थे ण्यत्-नञ्समासः।) हीरकं। इति राजनिर्घण्टः॥ अभेदनीयवस्तुनि त्रि। यथा,—

"अस्त्राण्यनेकरूपाणि तथाभेद्यञ्च दंशनं"।
इति देवीमाहात्म्यं॥

अभोजनं, क्ली, (भुज् + भावे ल्युट्, नञ्समासः।) भोजनाभावः। उपवासः। यथा,—

"अजीर्णे भोजनं येषां जीर्णे येषामभोजनं।
रात्रावभोजनं येषां तेषां नश्यन्ति धातवः"॥
इति वैद्यकं॥ (अनशनं।
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं"॥
इति मलमासतत्त्वं।)

अभ्यग्रं, त्रि, (अभिमुखमग्रं यस्य तत्।) समीपं निकटं। इत्यमरः॥

अभ्यङ्गः, पुं, (अभि + अन्ज घञ् कुत्वं।) तैलमर्दनं। तत्पर्य्यायः। स्नेहनं २। इति राजनिर्घण्टः॥ यथा,—

"तैलमल्पं यदङ्गेषु न च स्याद्बाह्यतर्पणं।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः॥
अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत्"॥
इत्यायुर्व्वेदः॥ * ॥ अस्य गुणाः। मार्दवकारित्वं। कफवातनाशित्वं। धातुपुष्टिजनकत्वं। त्वग्वर्णबलप्रदत्वञ्च॥ पादाभ्यङ्गगुणाः। निद्राचक्षुर्हितकारित्वं। पादरोगनाशित्वञ्च॥ पादगते द्वे शिरे चक्षुषि सम्बद्धे स्तः अतश्चक्षुर्हितार्थिना पादाभ्यङ्गः करणीयः॥ कफग्रस्तकृतभेदवमनाजीर्णिभिर्नाभ्यङ्गः करणीयः। इति राजवल्लभः॥ * ॥ अपरञ्च।

"मूर्द्ध्नि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतं।
स्रोतोभिस्तर्पयेद्बाह्य स चाभ्यङ्ग उदाहृतः"॥
तत्पर्य्यायः। अभ्यञ्जनं २। इति शुद्धितत्त्वधृतायुर्व्वेदः॥ आभां इति भाषा।

अभ्यक्षः, पुं, (अभि + अक्ष + अच्, पृषोदरादित्वात् साधु।) तिलकल्कः। इति ऋग्वेदिश्राद्धप्रयोगः॥

अभ्यञ्जनं, क्ली, (अभि + अन्ज + कर्म्मणि ल्युट्।) तैलं। इति हेमचन्द्रः॥ अभ्यङ्गः। इति राजनिर्घण्टः॥ (तैलादिना शिरःसहितदेहमर्द्दनम्।

"भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः॥
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति"॥
इति मनुः।)

अभ्यन्तरं, क्ली, (अन्तरमभिगतं प्रादिसमासः।) मध्यं। तत्पर्य्यायः। अन्तरालं २। इत्यमरः॥ अन्तः ३ अन्तरं ४ अन्तरालकं ५। इति राजनिर्घण्टः॥

("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ"।
इति भगवद्गीता।)

अभ्यमितः, त्रि, (अभि + अम् + क्तः।) रोगी। इत्यमरः॥

अभ्यमित्रीणः, पुं, (अमित्रस्याभिमुख्यं अव्ययीभावसमासः, अलङ्गामीत्यधिकारे अभ्यमित्र + ख तस्य ईनः।) अभ्यमित्र्यः। इत्यमरः॥